## 13 - त्रयोदश दशकम्

## हिरण्याक्ष वधम्

हिरण्याक्षं तावत् वरद भव दन्वेषण परं
चरन्तं सांवर्ते पयसि निज जङ्घा परिमिते ।
भवद्भक्तो गत्वा कपट पटु धीर् नारदमुनि:
शनैरूचे नन्दन् दनुज मपि निन्दंस् तव बलम् ॥ ॥13-1॥

स मायावी विष्णुर् हरति भवदीयां वसुमतीम्
प्रभो कष्टं कष्टं किमिद मिति तेनाभि गदित: ।
नदन् क्वासौ क्वासौ इति स मुनिना दर्शित पथ:
भवन्तं सम्प्रापत् धरणिधर मुद्यन्त मुदकात् ॥ ॥13-2॥

अहो आरण्योऽयं मृग इति हसन्तं बहुतरै:
दुरुक्तैर् विध्यन्तं दिति सुत मवज्ञाय भगवन् ।
महीं दृष्ट्वा दंष्ट्रा शिरसि चकितां स्वेन महसा
पयोधा वाधाय प्रसभ मुदयुङ्क्था मृध विधौ ॥ ॥13-3॥

गदा पाणौ दैत्ये त्वमपि हि गृही तोन्नत गद:
नियुद्धेन क्रीडन् घट घट रवोद्घुष्ट वियता ।
रणालो कौत्सुक्यात् मिलति सुरसङ्घे द्रुतममुं
निरुन्ध्यास् सन्ध्यात: प्रथम मिति धात्रा जगदिषे ॥ ॥13-4॥

गदोन्मर्दे तस्मिन् तव खलु गदायां दितिभुवः
गदा घातात् भूमौ झटिति पतिताया महह! भोः ।
मृदु स्मेरास्यस् त्वम् दनुज कुल निर्मूलन चणं
महाचक्रं स्मृत्वा करभुवि दधानो रुरुचिषे ॥ ॥13-5॥

ततश् शूलं काल प्रतिम रुषि दैत्ये विसृजति
त्वयि छिन्दत् येतत् करकलित चक्र प्रहरणात् ।
समारुष्टो मुष्ट्या स खलु वितुदंस् त्वां समतनोत्
गलन्माये मायास् त्वयि किल जगन् मोहनकरीः ॥ ॥13-6॥

भवच्चक्र ज्योतिष् कणलव निपातेन विधुते
ततो मायाचक्रे वितत घन रोषान्ध मनसम् ।
गरिष्ठाभिर् मुष्टि प्रहृतिभि रभिघ्नन्त मसुरं
स्वपादाङ्गुष्ठेन श्रवण पद मूले निरवधीः ॥ ॥13-7॥

महाकायस् सोऽयं तव चरण पात प्रमथितः
गलद्रक्तो वक्त्रात् अपत दृषिभिश् श्लाघित हतिः ।
तदा त्वा मुद्दाम प्रमद भर विद्योति हृदयाः
मुनीन्द्रास् सान्द्राभिः स्तुतिभि रनुवन् नध्वर तनुम् ॥ ॥13-8॥

त्वचि छन्दो रोमस्वपि कुशगणश् चक्षुषि घृतं
चतुर् होतारोऽङ्घ्रौ स्रुगपि वदने चोदर इडा ।
ग्रहा जिह्वायां ते पर पुरुष कर्णे च चमसाः
विभो सोमो वीर्यं वरद गल देशेऽप्युपसदः ॥ ॥13-9॥

मुनीन्द्रै रित्यादि स्तवन मुखरैर् मोदित मनाः
महीयस्या मूर्त्या विमलतर कीर्त्या च विलसन् ।
स्वधिष्ण्यं सम्प्राप्तः सुखरस विहारी मधुरिपो
निरुन्ध्या रोगं मे सकलमपि वातालय पते ॥ ॥13-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥